Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 3 | ISSN : 2581- 6306

# भारतीयदर्शने व्यक्तित्त्वम्

**वरुणसौरभपोखरियाल:**
शोधच्छात्र:, शिक्षाशास्त्रविभाग:, केन्द्रीयसंस्कृतविश्वविद्यालय:, नवदेहली, लखनऊपरिसर:, लखनऊ, उत्तरप्रदेश:।

**शोधलेखसार**:-'व्यक्तित्त्वं' शब्दोऽयं अत्यन्तव्यापको वर्तते। सामान्यतया वक्तुं शक्यते यत् व्यक्ते: सारतत्त्वं व्यक्तित्त्वम्। व्यक्ते: सम्पूर्णगुणानां लक्षणानाञ्च समावेश: व्यक्तित्त्वमुच्यते। लोकव्यवहारे विविधेषु अर्थेषु प्रयुज्यते अयं शब्द:। प्राय: बाह्यस्वरूपं व्यक्तित्त्वमुच्यते। इदं स्त्रीषु पुरुषानुरागजनकत्वेन सह पुरुषेषु स्त्रीमनोमुग्धकारित्त्वं संस्कृतसाहित्याकाशे विविधेषु वैदिकलौकिकपुराणादिषु विशिष्टार्थे प्रयुज्यमानम् उपलभ्यते। अव्यक्तं रहस्यमपि परपुरुषचित्ताकर्षिका एका विशिष्टा शक्ति: भवति व्यक्तित्वम्। अस्य पदस्य प्रयोग: बौद्धिकसांवेगिकसामाजिकाध्यात्मिकगुणानाञ्च अभिव्यञ्जनाय अपि अवलोक्यते। अस्मिन् विषये मनोवैज्ञानिकेषु अपि मतैक्यं नोपलभ्यते। केचन व्यक्तित्त्वं चरित्रस्वभावयो: गुणविशेषरूपेण स्वीकुर्वन्ति, केचन समस्तशारीरिकमानसिकविशिष्टगुणान् व्यक्तित्वमिति स्वीकुर्वन्ति। कथयितुं शक्यते यत् व्यक्ते: विविधमानसिकक्रियाकलापानां मूलप्रवृत्तिसंवेदनकल्पनाचिन्तनादीनां सामञ्जस्यपूर्णं व्यवस्थितस्वरूपमेव भवति व्यक्तित्वम्।

**मुख्यशब्दा:-** मानव: न शारीरिकमात्रमेव, शरीरं तु केवलं बाह्यावरणम् अचेतनप्रकृतिरूपात्मकमन्नमयकोशेन परिपोषितं स्थूलञ्च भवति। वस्तुत: व्यक्तित्त्वं स्वात्मनिष्ठतत्त्वानामवगमनं साक्षात्कारश्च भवति। गुणत्रयात्मिका प्रकृति: भवति।

**सत्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलं च रज:।**
**गुरुवरणकमेव तम: प्रदीपवाच्चार्थतो वृत्ति:॥**[1]

1. सात्विकव्यक्तित्त्वम्
2. राजसिकव्यक्तित्त्वम्
3. तामसिकव्यक्तित्त्वम्

एते त्रयो गुणा: एव चेतनगुणानाम् आधारतत्त्वरूपेणावतिष्ठन्ति। महर्षिकपिलेन व्यक्तित्त्वमिति पदं पदद्वयेन स्वीकृतं यथा–पुरुष: प्रकृतिश्च। पुरुषो नाम चेतनं प्रकृतिर्नाम जडश्च।[2]

**मूलप्रकृतिरविकृतिर्महदाद्या: प्रकृतिर्विकृतय: सप्त।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृति: पुरुष:॥**[3]

पुन: व्यक्तित्त्वं पञ्चविंशतितत्त्वानि निर्माति। यथा–

1. अन्त:करणम् –मनबुद्धिचित्ताहङ्कारश्च।
2. तन्मात्रा: – शब्दरूपगन्धस्पर्शरसाश्च।

---

[1]. सांख्यकारिका, ईश्वरकृष्ण, सांख्यतत्त्वकौमुदी, 1993 मिश्र वाचस्पति, श्लोक–13, पृ.–143

[2]. सांख्यकारिका, ईश्वरकृष्ण, सांख्यतत्त्वकौमुदी, 1993 मिश्र वाचस्पति, श्लोक–3

[3]. सांख्यकारिका, ईश्वरकृष्ण, सांख्यतत्त्वकौमुदी, मिश्र वाचस्पति, श्लोक–3, पृ.53,1931.

3. पञ्चमहाभूतानि - पृथ्वीजलवायु-अग्न्याकाशश्च।

4. पञ्चज्ञानेन्द्रियाणि - त्वग्जिह्वानासिकाकर्णचक्षुश्च।

5. पञ्चकर्मेन्द्रियाणि - वाक्पाणिपादपायूपस्थानि।

उपर्युक्तपञ्चविंशतितत्त्वानि मिलित्वा व्यक्तित्त्वस्य निर्माणं कुर्वन्ति। श्रीमद्भगवद्गीतायां श्रीकृष्णेन "पराऽपरानाम्ना तत्त्वद्वयमुद्घोषितम्"। तत्र परा नाम चेतनम्, अपरा नाम जडमिति।

**महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च।**

**इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः॥[4]**

जीवानां प्रकृतिः गुणत्रयात्मिका भवति। येषां त्रयोगुणयुक्ता प्रकृतिः एव चेतनामुद्दीपयति। अनेनैव स्ववातावरणेन सह गुणत्रयात्मकप्रकृत्यनुगुणं व्यवहारं कुर्वन्ति मानवाः।

**सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।**

**निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥[5]**

भारतीयसाहित्ये एतेषां त्रयाणां गुणानामाधारेण शरीरस्य त्रयः विभागः कृतः। यथा- 1) स्थूलशरीरम्, 2) सूक्ष्मशरीरम्, 3) कारणशरीरञ्च।

1) स्थूलशरीरम्- आनुमानिकं रूपेणोत्पन्नम् अन्नादिभिः परिपोषकतत्त्वैः अभिवृद्धिरूपात्मकम्। पृथ्वीजलाग्निवाय्वाकाशैः पञ्चभूतैः परिपुष्टं तमोगुणाधिक्यं भवति स्थूलशरीरम्।

2) सूक्ष्मशरीरम्- पञ्चज्ञानेन्द्रियैः सह पञ्चप्राणानां -प्राणम्, अपानम्, व्यानम्, समानम्, उदानञ्च एतेषां शक्तिदायकं मन्दबुद्धिचित्ताहङ्कारयुक्तम् अष्टादशशक्तियुक्तं रजोस्वरूपात्मकं भवति सूक्ष्मशरीरम्।

3) कारणशरीरम्- उभयोः स्थूलसूक्ष्मशरीरयोः शक्तिदायकः सात्विकगुणविशेषः भवति कारणशरीरम्।

भारतीयमनोविज्ञानस्य मूलाधारं वर्तते उपनिषद्। उपनिषदि वर्णितमस्ति यत् पञ्चकोशैः विनिर्मितं मानवव्यक्तित्त्वं वर्तते। इमे पञ्चकोशाः बाह्यान्तरिकरूपेण मानवव्यक्तित्त्वं निर्मान्ति। एते पञ्चकोषाः चेतनस्वरूपात्मकं भवन्ति।

**"अथान्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः पञ्च कोशाः। अन्नरसेनैव भूत्वान्नरसेनाभिवृद्धिं प्राप्यान्नमयपृथिव्यां यद्विलीयते सोऽन्नमयकोशः। तदेव स्थूलशरीरम्। कर्मेन्द्रियैः सह प्राणादिपञ्चकं प्राणमयकोशः। ज्ञानेन्द्रियैः सह बुद्धिर्विज्ञानमयकोशः। एतत्कोशत्रयं लिङ्गशरीरम्। स्वरूपानन्दमयकोशः। तत्कारणशरीरम्॥ "[6]**

1. अन्नमयकोशः
2. प्राणमयकोशः
3. मनोमयकोशः
4. विज्ञानमयकोशः
5. आनन्दमयकोशः

(1) अन्नमयकोशः- स्थूलसूक्ष्मशरीरमेव अन्नमयकोशः कथ्यते। ऋषयः तत्त्वदर्शिनः अन्नमयकोशस्य विषये विवेचयन्ति- अन्नमयः कः?- अन्नरसमेव भुक्त्वान्नरसेनाभिवृद्धिं प्राप्याऽन्नरसमयपृथिव्यां यद्विलीयते सोऽन्नमयकोशः। तदेव स्थूलशरीरमिति।[7] अयं कोशः रजोवीर्येण उत्पद्यते, अन्नेन संवर्ध्यते। अत एव अस्य नाम अन्नमयकोश इति। मनसः शुद्धीकरणं अन्नेन भवति। अस्य कोशस्य सम्बन्धः सामान्येन आहारेण प्रतीयते। येन स्थूलशरीरं स्वस्थं भवति, यस्मिन् स्वस्थं मनः निवसति। यथा पाश्चात्यदार्शनिकेन अरस्तुमहोदयेन उक्तं यत् "स्वस्थे शरीरे एव स्वस्थं मनः तिष्ठति"। कलुषितं मनः

[4]. श्रीमद् भगवद्गीता, शांकरभाष्य, श्रीहरिकृष्णदास गोयन्दका, अ-13श्लोक-5, पृ.-315

[5]. श्रीमद् भगवद्गीता, शांकरभाष्य, श्रीहरिकृष्णदास गोयन्दका, अ-14,श्लो.5, पृ.सं.352

[6]. पैंगलोपनिषद्,2/4

[7]. पैंगलोपनिषद्,2/4

सात्विकाऽऽहारेण परिमार्जयितुं शक्यते।[8] अयं कोशः प्राणमयकोशस्य जागृताधारः वर्तते। अस्य सर्वाङ्गीणविकासेन चिरयौवनम् आरोग्यतां दीर्घजीवनं च मानवः प्राप्नोति।

(2) प्राणमयकोशः– अयं कोशः जैविकसांवेगिकशक्तीनां विषये प्रमुखस्थानं विदधाति। शरीरस्य सर्वासां क्रियाणां सञ्चालनम् अनेनैव कोशेन जायते। वस्तुतः अयं कोशः पञ्चानां प्राणानां समाहारो वर्तते। येन प्राणिषु पञ्चावयवैः सह रक्तसञ्चारः भवति निर्माणञ्च भवति। पञ्चकर्मेन्द्रियाणि विषयान् प्रति प्रवृत्तानि भवन्ति। अनेन साहसशौर्यपराक्रमप्रभावप्रतिभादीनां विकासः तत्–तत् क्षेत्रेषु अधिकारं संवर्धयति।

(3) मनोमयकोशः– सर्वेषु जीवेषु मानव इव विकासं वृद्धिं च न प्राप्नुवन्ति। यतो हि तस्मिन् सङ्कल्पविकल्पात्मकं मनः तिष्ठति। मानवः पूर्वानुभवानामाधारेण स्वव्यवहारं परिष्करोति। मनसा इन्द्रियैः च प्राप्तज्ञानानां विश्लेषणं सञ्चयनं एवञ्च वर्गीकरणं भवति। मनसा सह पञ्चज्ञानेन्द्रियाणां संयोगेन मनोमयकोशस्य निर्माणं भवति। अस्मिन् कोशे पूर्णाशक्तिः इच्छाशक्तिश्च निर्मिता भवति। कोशस्यास्य वृद्ध्या मानवः दूरदृष्टिं विवेकशीलतां बुद्धिमतां च प्राप्नोति। वस्तुतः समस्तमानसिकक्रियाणां संवेगानां सर्जनं अस्मिन्नेव कोशे भवति।

(4) विज्ञानमयकोशः– निश्चयात्मिका बुद्धिरेव विज्ञानमयकोशः कथ्यते। मानवजीवने बहव्यः घटनाः आन्तरिका बाह्याश्च समुद्भाविता भवन्ति। तस्याः समस्यायाः व्यवस्थितसमाधानं बुद्ध्या एव भवति। विज्ञानमयकोशस्य मानवे सद्गुणाः समुद्भवन्ति।

(5) आनन्दमयकोशः– सत्त्वगुणविशिष्टः आनन्दमयकोशः। आनन्दस्य अभिव्यक्तिः पूर्णत्वेन न भवितुमर्हति, यतो हि आनन्दः तु केवलम् अनुभूतिजन्यो भवति। विज्ञानमयकोशात् अधिकसूक्ष्मः, अधिकव्यापकः, अधिकसरलः, अधिकशुद्धः आनन्दमयकोशो भवति। अयं कोशः चित्तः अपि कथ्यते। चित्तस्य स्वभावः भवति आनन्दः, प्रेमः, सौन्दर्यता, स्वतंत्रता सहजता च। मानवस्य निरपेक्षावस्था एव आनन्दः।

श्रीमद्भगवद्गीतायामपि व्यक्तित्त्वस्य चर्चा विहिताऽस्ति। तत्र कृष्णार्जुनयोः मध्ये परस्परं व्यक्तित्त्वविषये विशद्वर्णनं प्राप्यते। यथा–

श्रीमद्भगवद्गीतायाम् अर्जुनो यदा पृच्छति यत् स्थितप्रज्ञः कः?[9] तदा भगवान् वासुदेवो वदति–

**प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्।**

**आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते।।**[10]

अर्थात् यदा पुरुषोऽयं मनसि स्थितसम्पूर्णकामनाः त्यजति सम्यक्तया तथा च स्वेनात्मना तुष्टिं प्राप्नोति। तदा सः स्थितप्रज्ञ उच्यते।

अनेन माध्यमेन भारतीयदर्शने व्यक्तित्त्वस्य विषये विस्तृता चर्चा प्राप्यते। भारतीयवाङ्मयानुसारेण व्यक्तित्त्वं व्यापकं विस्तृतञ्च भवति।

**सन्दर्भग्रन्थाः –**

1. श्रीमद्भगवद्गीता
2. सांख्यकारिका
3. पैंगलोपनिषद्
4. Archak, K.B., Personality development in Sanskrit literature

---

[8]. Archak, K.B., Personality development in Sanskrit literature

[9]. श्रीमद्भगवद्गीता, 2/54

[10]. श्रीमद्भगवद्गीता, 2/55